# Agnistava by Brihaspati

# બૃહસ્પતિના અગ્નેર્દેવસ્ય સ્તવનમ્

## Document Information

Text title : Agni Stavana by Brihaspati

File name : agnistavanambRRihaspati.itx

Category : deities_misc, stuti

Location : doc_deities_misc

Description/comments : From Mahabharata Harivamsha 3. Bhavishyaparva Chapter 62 Verses 29-40

Latest update : September 9, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 9, 2023

*sanskritdocuments.org*

# બૃહસ્પતિના અગ્નેર્દેવસ્ય સ્તવનમ્

ગુરુરુવાચ ।
હિરણ્યરેતઃ સુમુખ જ્વલનાહ્વય સર્વભુક્ ।
સપ્તજિહ્વાનન ક્ષામ લેલિહાન મહાબલ ॥ ૧॥

આત્મા વાયુસ્તવ વિભો શરીરં સર્વવીરુધઃ ।
યોનિરાપશ્ચ તે પ્રોક્તા યોનિસ્ત્વમસિ ચામ્ભસઃ॥ ૨॥

ઊર્ધ્વં ચાધશ્ચ ગચ્છન્તિ સંચરન્તિ ચ પાર્શ્વતઃ ।
અર્ચિષસ્તે મહાભાગ સર્વતઃ પ્રભવન્તિ ચ ॥ ૩॥

ત્વમેવાગ્ને સર્વમસિ ત્વયિ સર્વમિદં જગત્ ।
ત્વં ધારયસિ ભૂતાનિ ભુવનં ત્વં બિભર્ષિ ચ ॥ ૪॥

ત્વમગ્ને હવ્યવાડેકસ્ત્વમેવ પરમં હવિઃ ।
યજન્તિ ચ સદા સન્તસ્ત્વામેવ પરમાધ્વરે ॥ ૫॥

ત્વમન્નં પ્રાણિનાં ભુઙ્ક્ષે જગત્ત્રાતાસિ ત્વં પ્રભો ।
ત્વયિ પ્રવૃત્તો વિજયસ્ત્વયિ લોકાઃ પ્રતિષ્ઠિતાઃ ॥ ૬॥

સર્વાંલ્લોકાંસ્ત્રીનિમાન્ હવ્યવાહ પ્રાપ્તે કાલે ત્વં પચસ્યેવ દીપ્તઃ ।
ત્વમેવૈકસ્તપસે જાતવેદો નાન્યસ્ત્વત્તો વિદ્યતે ગોષુ દેવ ॥ ૭॥

વૃષાકપિઃ સિન્ધુપતિસ્ત્વમગ્ને મહામખેષ્વગ્ર્યહરસ્ત્વમેવ ।
વિશ્વસ્ય ભૂમ્નસ્ત્વમસિ પ્રસૂતિસ્ત્વં ચ પ્રતિષ્ઠા ભગવન્ પ્રજાનામ્ ॥ ૮॥

સૃજસ્યપો રશ્મિભિર્જાતવેદસ્તથૌષધીરોષધીનાં રસાંશ્ચ ।
વિશ્વં ત્વમાદાય યુગાન્તકાલે સ્રષ્ટા ભવસ્યાનલ સર્ગકાલે ॥ ૯॥

ત્વમગ્ને સર્વભૂતાનાં યોનિર્વેદેષુ ગીયસે ।
ત્વયા દેવહિતાર્થાય નિહતા દાનવા રણે ॥ ૧૦॥

સ્વયોનિસ્તે મહાતેજસ્તોયં મખશતાર્ચિત ।

તાં સ્વયોનિં સમાસાદ્ય કિં વિષીદસિ પાવક ॥ ૧૧॥

ત્રાયસ્વ સમરે દેવાન્ દૈત્યેભ્યઃ સુરસત્તમ ।
પિઙ્ગાક્ષ લોહિતગ્રીવ કૃષ્ણવર્ત્મન્ હુતાશન ॥ ૧૨॥

ઇતિ બૃહસ્પતિના અગ્નેર્દેવસ્ય સ્તવનં સમ્પૂર્ણમ્ ।

મહાભારત ખિલભાગે હરિવંશ ભવિષ્યપર્વણિ દ્વિષષ્ટિતમોઽધ્યાયઃ ૩.૬૨.૨૯-૪૦

mahAbhArata khilabhAge harivaMsha bhaviShyaparvaNi dviShaShTitamo.adhyAyaH 3.62.29-40

*Agnistava by Brihaspati*

pdf was typeset on September 9, 2023

Please send corrections to *sanskrit@cheerful.com*